# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**- शास्त्री (SEM-3) | **प्रश्नपत्रम्**-६ (New & Old) | **गुणाः** - ७० |
| **विषयः** - पुराणेतिहासः | **कोड**- **CC- 2-3-6** | **समयः** - २ तः ५ |
| **दिनाङ्कः** - १०/१२/२०१८ | **सन्दर्भग्रन्थः**- महाभारते वनपर्वान्तर्गतं नलोपाख्यानम् | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ कयोरपि द्वयोः श्लोकयोः ससन्दर्भं प्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या ।** **१०**

१. क्षात्रं धर्मं महाराज त्वमवेक्षितुमर्हसि ।
न हि धर्मो महाराज क्षत्रियस्य वनाश्रयः ॥

२. प्राप्तुमिच्छन्ति देवास्त्वां शक्रोऽग्निर्वरुणो यमः ।
तेषामन्यतमं देवं पतित्वे वरयस्व ह ।

३. हंसानां वचनं श्रुत्वा यथा मे नैषधो वृतः ॥
पतित्वे तेन सत्येन देवास्तं प्रदिशन्तु मे ॥

**प्र-२ कस्याप्येकस्य सविस्तरमुत्तरं लिखत ।** **१०**

१. नलदमयन्त्योः नलस्यावस्थावर्णनम् । ।

२. स्वयंवरप्रसङ्गनिरूपणम् ।

**॥ द्वितीयान्वितिः ॥**

**प्र-३ कयोरपि द्वयोः श्लोकयोः ससन्दर्भं प्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या ।** **१०**

१. गत्वा गत्वा नलो राजा पुनरेति सभां मुहुः ।
आकृष्यमाणः कलिना सौहृदेनावकृष्यते ॥

२. उक्तमात्रे तु वचने तथा स मृगजीवनः ।
व्यसुः पपात मेदिन्यामग्निदग्ध इव द्रुमः ॥

३. यदि कैश्चिदहोरात्रैर्न द्रक्ष्यामि नलं नृपम् ।
आत्मनं श्रेयसा योक्ष्ये देहस्यास्य विमोचनात् ॥

**प्र-४ कस्याप्येकस्य सविस्तरमुत्तरं लिखत ।** **१०**

१. वने नलस्यावस्थावर्णनम् ।

२. कर्कोटककथा ।

॥ तृतीयान्वितिः ॥

**प्र-५ कयोरपि द्वयोः श्लोकयोः ससन्दर्भं प्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या । १०**

१. सर्वः सर्वं न जानाति सर्वज्ञो नास्ति कश्चन ।
नैकत्र परिनिष्ठास्ति ज्ञानस्य पुरुषे क्वचित् ॥

२. तस्याक्षहृदयज्ञस्य शरीरान्निः सृतः कलिः ।
कर्कोटकविषं तीक्ष्णं मुखात् सततमुद्वमन् ॥

३. स चतुर्थे ततो वर्षे संगम्य सह भार्यया ।
सर्वकामैः सुसिद्धार्थो लब्धवान् परमां मुदम् ॥

**प्र-६ कस्याप्येकस्य सविस्तरमुत्तरं लिखत । १०**

१. ऋतुपर्णनलयोः मध्ये विद्यादानप्रदानप्रसङ्गनिरूपणम् ।

२. दमयन्तिबाहुकयोः संवादनिरूपणम् ।

॥ चतुर्थान्वितिः ॥

**प्र-७ दशानां लघूत्तराणि लिखत । १०**

१. अक्षाः किं धूपं धृत्वा वने आगताः?

२. दमयन्तीतेजसा कः दग्धः?

३. नलस्य रूपं केन विकृतम्?

४. नलेन गुप्तावासे किं नाम धृतम्?

५. नलवस्त्रहर्तारः के?

६. द्यूते नलः केन पराजितः?

७. दमयन्त्याः मस्तके कस्य चिह्नम् आसीत्?

८. किं वेतनं नलः ऋतुपर्णाकः प्राप्नोत्?

९. नलसंशोधने दमयन्त्या कः प्रेषितः?

१०. महाभारते पाण्डवान् कः नलाख्यानं श्रावयति?

११. नलोपाख्यानकथा केन पाण्डवेन न श्रुता?

१२. नलदमयन्त्योः पुत्रस्य नाम किम्?

१३. शुचिर्नाम कः ?

१४. किं पर्वान्तर्गतं नलोपाख्यानम्?

१५. आश्वानां वाहने युक्तः पृथिव्यां नास्ति मत्समः - इति कः कस्मै वदति?

--००--